॥ श्रीज्ञानप्रसूनाम्बिकास्तोत्रम् ॥

माणिक्याञ्चितभूषणां मणिरवां माहेन्द्रनीलोज्ज्वलाम्
मन्दारद्रुममाल्यभूषितकुचां मत्तेभकुम्भस्तनीम्
मौनिस्तोमनुतां मराळगमनां माध्वीरसानन्दिनीम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥१ ॥

श्यामां राजनिभाननां रतिहितां राजीवपत्रेक्षणाम्
राजत्काञ्चनरत्नभूषणयुतां राज्यप्रदानेश्वरीम् ।
रक्षोगर्वनिवारणां त्रिजगतां रक्षैकचिन्तामणिम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥२ ॥

कल्याणीं करिकुम्भभासुरकुचां कामेश्वरीं कामिनीम्
कल्याणाचलवासिनीं कलरवां कन्दर्पविद्याकलाम् ।
कामाक्षीं कलबिन्दुकल्पलतिकां कामारिचित्तप्रियाम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥३ ॥

भावातीतसुधाप्रभावभरितां ब्रह्माण्डभाण्डोदरीम्
बालां बालकुरङ्गनेत्रयुगलां भानुप्रभाभासिताम् ।

भास्वत्क्षेत्ररुचाभिरामनिलयां भव्यां भवानीं शिवाम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥४ ॥

वीणागानविनोदिनीं विजयिनीं वेतण्डकुम्भस्तनीम्
विद्वद्वन्दितपादपद्मयुगलां विद्याप्रदां शाङ्करीम् ।
विद्वेषिण्यभिरञ्जिनीं स्तुतिविभां वेदान्तवेद्यां शिवाम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥५ ॥

नानाभूषितभूषणादिविमलां लावण्यपाथोनिधिम्
काञ्चीचञ्चलघण्टिकाकलरवां कञ्जातपत्रेक्षणाम् ।
कर्पूरागरुकुङ्कुमाङ्कितकुचां कैलासनाथप्रियाम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥६ ॥

मञ्जीराञ्चितपादपद्मयुगलां माणिक्यभूषान्विताम्
मन्दारद्रुममञ्जरीमधुझरीमाधुर्यमाध्वीरसाम् ।
मातङ्गीं मधुरालसां करशुकां नीलालकालङ्कृताम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥७ ॥

कर्णालम्बितहेमकुण्डलयुगां कादम्बवेणीमुमाम्

अम्भोजासनवासवादिविनुतामर्धेन्दुभूषोज्ज्वलाम् ।
कस्तूरीतिलकाभिराममिनिटिलां गानप्रियां श्यामलाम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥८ ॥

कौमारीं नवपल्लवांघ्रियुगलां कर्पूरभासोज्ज्वलाम्
गङ्गावर्तसमानानाभिकुहरां गाङ्गेयभूषान्विताम्
चन्द्रार्कानलकोटिकोटिसदृशां चन्द्रार्कबिम्बाननाम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥९ ॥

बालादित्यनिभाननां त्रिनयनां बालेन्दुना भूषिताम्
नीलाकारसुकेशिनीं विलसितां नित्यान्नदानप्रियाम्
शंखं चक्रवराभयं च दधतीं सारस्वतार्थप्रभाम्
ध्याये चेतसि काळहस्तिनिलयां ज्ञानप्रसूनाम्बिकाम् ॥१० ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]